International Journal of Leading Research Publication (IJLRP)
E-ISSN: 2582-8010 ● Website: www.ijlrp.com ● Email: editor@ijlrp.com

# काव्यपरिप्रेक्ष्यात् श्रीमद्भागवतमहापुराणस्य

## जसराम बैरवा

सहायकआचार्य, संस्कृत
राजकीय कन्या महाविद्यालय, नादौती, करौली

**प्रस्तावना**

काव्यस्यारम्भः मन्ये ऋग्वेदाद्भवत् इति अनुमातुं शक्यते । यतो हि काव्यस्य कृते यो मापदण्डः निर्धारितः इदानीमपि स तत्रापि सङ्गच्छते । यद्यपि वेदाः आदावेव बभूवुः तथापि काव्यत्वपरीक्षकाः तत्रापि परीक्षणं कुर्वन्ति । लौकिकसाहित्य दृष्ट्या आदिकाव्यं वाल्मीकि रामायणं विद्यते ततश्चान्यान्यपि काव्यानि संवर्धितानि।काव्यदृष्ट्या श्रीमद्भागवत्महापुराणस्य वैशिष्ट्योपस्थापनात् प्राक् काव्यविषये किञ्चित् विचार्यते -

कविशब्दात् ण्यत्-प्रत्यये कृते सति 26 कवेः भावः इत्यस्मिन्नर्थे काव्यम् इति पदं निष्पन्नं भवति । ऋषिगुणान्वितं कविगुणान्वितं वा भवति काव्यं । काव्यम् कविता इत्यपि निगद्यते । काव्यशास्त्रस्य प्रणेतारः काव्यस्य नाना परिभाषाःप्रणीतवन्तः । काश्चन 27 इमाः सन्ति । -

शब्दार्थौ सहितौ काव्यम् (वक्रोक्तिजीवितम् 1.17)

शब्दार्थौसहितौ वक्रकविव्यापारशालिनी ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी ।। (वक्रो. 1.7)

काव्यप्रकाशकारः आचार्यमम्मटः काव्यस्य लक्षणमित्थं व्यनक्ति तद्दोषौ शब्दार्थौ गुणावनलंकृती पुनः क्वापि ।

काँश्चन आचार्यान् विहाय अन्ये शब्दार्थौ काव्यं स्वीकुर्वन्ति । तद्यथा-

1. शब्दार्थौ सहितौ काव्यं गद्य पद्यं च तद् द्विधा । (भामह 1.16)
2. काव्यशब्दोऽयं गुणालङ्कारसंस्कृयोः शब्दार्थयोवर्तते । (वामनः 1.1)
3. शब्दार्थौ काव्यम् (रुद्रटः काव्यालङ्कारः 2.1)
4. अशब्दार्थौ सगुणौ सालङ्कारौ च शब्दार्थी काव्यम् (हेमचन्द्र पृ.16)
5. शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम् (वाग्भद्र पृ. 14)
6. गुणालङ्कारसहितौ शब्दार्थौदोषवर्जितौ (विद्यानाथः प्रतापरुद्र 14)
7. शब्दार्थौ वपुरस्य तत्र विवुधैरात्माभ्यधायिध्वनिः (विद्याधर एकावल्ली पृ. 1,19)(काव्यप्रकाशः पृ. 24)
8. शरीरं तावदिष्टार्थव्यवच्छिन्नापदावली (काव्यादर्श 1, 9-10)
9. रीतिरात्मा काव्यस्य (वामनः काव्यालङ्कारसूत्र 1, 2, 6)काव्यास्यात्माध्वनिः (ध्वन्यालोकः 1,1)

साहित्यदर्पणग्रन्थे अनेन प्रकारेण उल्लिखतमस्ति -

तत्किं पुनः काव्यमित्युच्यते -

वाक्यं रसात्मकं काव्यम् ..........।

रसस्वरूपं निरूपयिष्यामः रसः एवात्मा साररूपतया जीवनाधायको यस्य । तेन विना तस्य काव्यत्वाभावस्य प्रतिपादितत्वात् । रस्यत इति रसः इति व्यत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते । तत्र रसो यथा -

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।

विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ।।
अन्वयः- रसात्मकं वाक्ये काव्यम् ।
रसः - श्रृङ्गारादिः, अनेन भावादयोऽपि गृहयन्ते आत्मा स्वरुपं प्राणतत्त्वं, यस्य तत्तादृशं, वाक्यं सार्थकपदसमूहः, काव्यं -काव्यनामभाक् इति ।
कारिकां व्याख्याति - रसेत्यादिना। रसस्वरूपं - रसस्य शृङ्गारादेः, स्वरुपं लक्षणं, निरूपयिष्यामः वक्ष्यामः ।
रसात्मकमिति । रसः शृङ्गारादिः एव न तु वस्त्वलङ्कारादिः,
आत्मा साररूपतया - मुख्यवस्तुत्वेन आनन्दसान्द्रत्वेन
श्रेष्ठभावतया, उक्तमेव -
व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि ।
रसादिमय एकस्मिन् कविः स्यादवधानवान् ।। इति ।
जीवनाधायकः = प्राणतत्वं यस्य तथेति । कथं तथेत्यपेक्षतयामाह - तेनेत्यादिना । तेन रसेन, विना तस्य काव्यस्य काव्यत्वं सिध्यति इति सिद्धान्तत्वेन सर्वेः स्वीकृतत्वात् ।
कारिकागतरसपदाशयं विवृणोति-रस्यत इत्यादिना । रस्यत आस्वाद्यत इति रसः, इति इत्थं, व्युत्पत्तियोगात्-व्युत्पत्तेः = प्रकृतिप्रत्ययविवेचनस्य, योगात् सम्बन्धात्, भावादयः = भाव-रसाभास-भावोदय-भावशान्ति-भावश-बलताद्याः, गृहयन्ते । तत्र-रतिर्देवादिविषया व्याभिचारी तथाञ्जितो भावः ।
रसाभासभावाभासाः = अनौचित्यप्रवर्तिताः रसा भावाश्च, गृह्यन्ते = परिगण्यन्ते । (साहित्यदर्पणः पृ. 34-35)
निष्कर्षरूपेण काव्ये न्यूनातिन्यूनं रसात्मकत्वं भवेदेव इति साहित्यदर्पणकारस्याभिमतम् । अलङ्कारादस्तु भूषणानि सन्त्येव काव्यस्य । कस्यचिदपि काव्यस्य मूल्याङ्कनाय एतद्दृष्ट्या रसपरीक्षणमनिवार्यतत्त्वं प्रतिभाति । अतः परमन्ये विषयाः आगच्छन्ति । यदि काव्ये अधिकाः गुणाः स्युः, तर्हि गुणाय एव भवन्ति इति तु निश्चितरुपेण वक्तुं शक्यते । अधिककस्याधिकं फलमित्याभाणकं प्रसिद्धमेव । रसोद्रेकापूरितं काव्यमेव जनान् आह्लादयति । एतादृशं काव्यं मानसिकसन्ताप निवारयति । रसः ब्रह्मानन्दसहोदर इव शोभते। अत एव 'रसो वै सः' इति उपनिषदि प्रदर्शितमस्ति । परमात्मा रसस्वरूपो विद्यते । तस्य परमात्मनः उपासना साहित्यिकरसमाध्यमेन क्रियते 1 श्रीमद्भागवते सर्वत्र भक्तेः चर्चा दृश्यते। अत्रापि परमात्मप्रेम एव मूले विराजते । ईश्वरे अगाधनिष्ठा श्रद्धा च प्रेम्णः प्राथमिकं लक्षणं प्रतिभाति । भक्ताः यदा कदा ईश्वरस्य प्रेम्णि क्रन्दनमपि कुर्वन्ति विरहवशात् । यादृशते भावः अस्माकं भवति तादृशो व्यवहारोऽपि जायते । भगवत्प्रीत्याः उत्कर्षः ईश्वरे शरणापत्रे सत्येव पूर्ति याति । एतादृशाः नैके भावाः ये काव्येषु भवन्ति ते श्रीमद्भागवतमहापुराणेऽपि सन्ति । अत एव काव्यदृष्ट्या श्रीमद्भागवतमहापुराणस्य वैशिष्ट्यमिहोपस्थाप्यते यथाग्रन्थम्
पश्यन्त्यदो रूपमदभ्रचक्षुषा
सहस्रपादोरुभुजननाद्भुतम् ।
सहस्रमूर्धश्रवणाक्षिनासिकं
सहस्रमौल्यम्बरकुण्डलोल्लसत् ।।
अत्र भगवतो नारायणस्य विराडूपस्य वर्णनं विलक्षणतया कृतं ग्रन्थकारेण । योगिनः दिव्यदृष्ट्यो भगवतः तस्य रूपस्य दर्शनं कुर्वन्ति । श्रीमद्भगवद्गीतायामपि श्रीभगवता अर्जुनं प्रति उत्यते -
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् । इति

सामान्यचक्षुभ्यां भगवतो दिव्यस्वरूपस्य दर्शनं न भवितुमर्हति । अतः दिव्यचक्षुषः आवश्यकता भवति । सामान्यरूपेण यदि विचार्यते तर्हि दिव्यचक्षुर्नाम शास्त्रचक्षुरेव ज्ञायते । शास्त्रैकलोचनः यथार्थज्ञानं प्राप्तुं समर्थोभवति । प्रकृतश्लोकस्य मन्ये तत्रैव तात्पर्यं विद्यते । अस्य श्लोकस्यान्वयः इत्थं कर्तुं शक्यते -

सहस्रपादोरुभुजाननान्द्भुतं सहस्रमूर्धश्रवणाक्षिनासिकं ।
सहस्रमौल्यम्बरकुण्डलोल्लसत् अदो रूपम् अदभ्रचक्षुषा पश्यन्ति (योगिनः) ।

श्लोकेऽस्मिन् पुरुषसूक्तस्थमन्त्रस्य प्रभावः स्पष्टतया ज्ञातुं शक्यते । तद्यथा -

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतपृत्वा-त्यतिष्ठद्दशाङ्गुलम् ।। इति ।

मत्रेऽस्मिन् पुरुष (विराट्-पुरुषस्य) सहस्रशीर्षा, सहस्राक्षः, सहस्रपात् इति विशेषणं विद्यते । सहस्रं शिरांसि सन्ति यस्य सः सहस्रशीर्षा । सहस्रम् अक्षीणि सन्ति यस्य स सहस्राक्षः सहस्र पादाः सन्ति यः स सहस्रपात् इति । एतादृशः सविशेषणः यः पुरुषः सः सर्वतस्पृत्वा भूमिम् अत्यतिष्ठत् दशाङ्गुलमुपरि इति । श्रीमद्भगवतमहापुराणस्य श्लोकं विचारयामश्चेत् तत्रापि 'सहस्रपादोरुभुजाननाद्भुतं यद्रूपम्, सहसर्मूर्धश्रवणाक्षिनासिकं यद्रूपम्, सहस्रमौल्यम्बरकुण्डलोल्लसत् यद्रूपम्, तद्रूपम् योगिनः ज्ञानचक्षुषा दिव्यचक्षुषा, विवेकचक्षुषा वा पश्यन्ति ।

प्रसङ्गऽस्मिन् रूपकावलम्बनं परिलक्ष्यते । यतो हि सहस्रपादवान् कश्चित् भवति इति विचारः विचारमात्रमेव विद्यते । यतो हि अत्र मनुष्य इव विमर्शः प्रचलति । मनुष्यरूपेणैव परमात्मनः अपि विचारः क्रियते । किन्तु नायं सामान्यः श्लोकः अपितु गम्भीरार्थसमायुक्तो विद्यते । अत्र विश्वस्य वर्णनं कृतं ग्रन्यकारेणा परमात्मा सर्वत्र व्याप्तोऽस्ति; अतः 'सहस्रम्' इति पदेन निश्चितसङ्ख्यायाः बोधो न जायते। असङ्ख्यातार्थे सहस्रशब्दस्य प्रयोगो दृश्यते । अत एवात्र गूढार्थन्वितं काव्यत्वं सङ्गच्छते ।

गोप्याददे त्वयि कृतागसि दाम तावद्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति ।।

इयमुक्तिः देव्याः कुन्त्याः वर्तते । भगवतः श्रीकृष्णस्य बाललीलायाः वर्णनमत्र दृश्यते । कुन्ती वदति-यदा बाल्याकाले भवान् दुग्धस्य मृत्तिकापात्रस्य भञ्जनं कृतवान् तदा माता यशोदा ईषत्कोपवशात् हस्ते दाम (रज्जुम्) गृहीतवती भवतः बन्धनाय । तां यशोदां विलोक्य भवतः चक्षुषोः अश्रुणि समागतानि, नेत्रयोः चाञ्चल्यमपि समागतम् । भयभयात् भवान् मुखमधः कृतवान् प तां दशां ध्यात्वा अहमद्यापि मोहिता भवामि । यतो हि यस्य
भयात् भयमपि भयं प्राप्नोति । यः कालस्यापि कालो वर्तते । तस्य इयं दशा वर्तते ।

धन्यं भारतवर्षम्, धन्या सा माता, धन्यं गन्दगृहम्, धन्यं वृन्दावनम्, धन्यातिधन्यतमं भगवतो बालरूपम् । श्लोकमेकं पठित्वा अर्थ विज्ञाय सहसा भगवतः स्वरूपं तत् हृदये प्रवशति । कर्मबन्धनस्य भेदको विद्यते यः सोऽद्य मातुः स्नेहपाशेन बन्धानाय नतमुखः स्थितोऽस्ति । यस्य कृपाकटाक्षेण संसारे उत्सवाः मूर्तिमन्तः सन्तः नृत्यन्ति । यस्य मानसिकसङ्कल्पेन सर्गस्थितिप्रलयाः भवन्ति । यस्य ध्यानं कृत्वा भक्ताः असारसंसारं परित्यज्य परमधाम गच्छन्ति । सोऽयं मातुः भयात् भीतः सन् नेत्राभ्यामश्रूणि मुञ्चति ।

वस्तुतः अत्र मातुः यशोदयाः भगवतो बालकृष्णस्य च उत्तमरीत्या वर्णनं विद्यते । एतादृशं काव्यं मनसि आनन्दं जनयति । अत एवोच्यते -

शृण्वन्ति गायन्ति गृणन्त्यभीक्षणशः
स्मरन्ति नन्दति तवेहितं जनाः ।
त एव पश्यन्त्यचिरेण तावकं

भवप्रवाहोपरमं पदाम्बुजम् ।।
भक्ताः पुनः पुनः भगवतः चरित्रं शृण्वन्ति, गायन्ति, स्मरन्ति, नन्दन्ति च। एतादृशा भक्ता एव पारं गच्छन्ति । शरशय्यासीनः पितामहो भीष्मः भगवता सह पाण्डवैः आवेष्टितोऽस्ति । सम्प्रति प्राणत्यागस्य कालः समागतः इति विषयं विचिन्त्य भगवन्तं प्रति उवाच -
भक्त्याऽऽवेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन् ।
त्यजन् कलेवरं योगी मुच्यते कामकर्मभिः ।।
स देवदेवो भगवान् प्रतीक्षतां
कलेवरं यावदिदं हिनोम्यहम् ।
प्रसन्नहासारुणलोचनोल्लस-
न्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ।।
अत्रायम्माशयः भक्त्या आवेश्य मनः वाचा यन्नाम कीर्तयन् कलेवरं त्यजन् योगी कामभिः तथा कर्मभिः मुच्यते । स एव देवानामपि देवः देवदेवो = भगवान् प्रसन्नहासारुणलोचनोल्लसन्मुखम्बुजो ध्यानपथश्चतुर्भजः यावत् अहं (भीष्मः) हिनोमि तावत् प्रतीक्षताम् ।
सत्यमिदं यत् भक्तस्य वशे परमात्मा तिष्ठति नोचेत् भीष्मः ज्ञात्वापि
स्नेहो विद्यते । यस्य दर्शनमात्रेण संसारान्मुक्तिर्जायते, स भगवान् अद्य भक्तस्य भावनया आबद्धः सन् प्रतीक्षते । उच्यते च -
यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुवन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोरनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरा सुरगणा देवाय तस्मै नमः। इति।
यं भगवन्तं ब्रह्मा वरुणेन्द्ररुद्रमरुतः दिव्यैः स्तवैः स्तुवन्ति, वेदैः साङ्गपदक्रमोपनिषदैः यं सामगाः गायन्ति, यं योगिनः ध्यानावस्थिततगतेन मनसा पश्यन्ति, यस्य अन्तं सुरासुरगणाः न विदुः, तस्मै देवाय नमः । यः परात्परब्रह्मस्वरूपः नारायणः विराट् पुरुषः जगदाधारः जगन्नियन्ता विद्यते; सोऽपि भक्तस्य देवव्रतभीष्मस्य कृते चतुर्भुजरूपेण उपस्थितो जातः । अत्र काव्यस्य स्वरूपमुत्तमं विद्यते ।
उपमायाः निदर्शनम् -
स उच्चकाशे धवलोदरोऽ-
प्युरुक्रमस्याधरशोणिमा ।
दाध्मायमानः करकञ्जसम्पुटे
यथाब्जखण्डे कलहंस उत्स्वनः ।।
आनत्तदिशं प्रविश्य तत्रत्यजनैः सह मिलित्वा तेषां व्यथां विज्ञाय तेभ्यः सन्त्वनां प्रदाय स्वश्रेष्ठशङ्ख पाञ्चजन्यनामकं प्रदध्म । यदा भगवतः अधरेण शङ्खः संयुक्तो जातः, तदा अधरस्य रक्तिमया सह संयुज्य तथा प्रतीयते यथा रक्तकमले राजहंसः उपविश्य उच्चैः मधुरगानं करोति ।
अत्राय विचारः भगवतः अधरस्य तुलना रक्तकमलेन सह वर्तते । शङ्खस्य तुलना राजहंसेन सह सञ्जातः । अत्र उपमायाः सुन्दरमुदाहरणं विद्यते।
मधुभोजदशार्हार्हकुकुशन्धकवृष्णिभिः ।
आत्मतुल्यवलैर्गुप्ता नागैर्भोगवतीमिव ।।
सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ।

उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ।।
सम्मार्जितमहामार्गरथ्यापणकचत्वराम् ।
सिक्तां गन्धजलैरुप्तां फलपुष्पादक्षताङ्कुरैः ।।
प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ।
प्रहर्षवेगोच्छशितशयनासनभोजनाः ।।
वारमुख्याश्च शतशो यानैस्तद्दशनोत्सुकाः ।
लसत्कुण्डलनिर्भातकपोलवदनश्रियः ।।
प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ।
आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ।।
एतेषु श्लोकेषु दीर्घसमासयुक्तशब्दान् वयं द्रष्टुं शक्नुमः । अत्र प्रसङ्गेऽस्मिन् द्वारिकापुर्याः वर्णनं विद्यते । यथा नागाः स्वभोगवतीनगरीं पातालपुरीं वा रक्षन्ति तथैव भगवतः द्वारकापुरी मधुभोजदशार्हार्हकुकुरान्धकवृष्णिवंशीययादवैः सुरक्षिता आसीत्। अत्रापि उपमा दृश्यते 139 पराक्रमिभिः
भगवांस्तत्र बन्धूनां पौराणामनुवर्तिनाम् ।
यथाविध्युपसंगम्य सर्वेषां मानमादधे ।।
प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ।
आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ।।
स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ।
आशीर्भिर्युज्यमानोऽन्यैर्वन्दिभिश्चाविशत्पुरम् ।।
एतेषु श्लोकेषु भगवतो नगरप्रवेशस्य समुचितं मनोहारि व्यवहारप्रदायकञ्च वर्णनं कृतं श्रीमद्भागवतमहापुराणकारेण भगवान् श्रीकृष्णः बन्धुबान्धवैः नागरिकैः सेवकैश्च सह पृथक् पृथक् मिलित्वा यथायोग्यसम्मानं कृतवान् । कांश्चित् नमनपुरस्सरं ननाम । कांश्चित् वाण्या अभिवाचनं चकार । केषाञ्चनालिङ्गनेन अभिवादनं कृतवान् । कैश्चित् सह हस्तमेलनञ्चकार । कदाचित् केषाञ्चन स्मितहास्यैः अभिवादनमकरोत् । काँश्चन् केवलं प्रेमदृष्ट्या अपश्यत् । यस्य या इच्छा आसीत् तदनुसारेणैव भगवान् तस्मै वरदानं ददौ। अनेन प्रकारेण चाण्डालपर्यन्तं सर्वान् सन्तोष्य आश्वास्य च गुरुभिः सपत्नीकब्राह्मणैः अनेन प्रकारेण चाण्डालपर्यन्तं सर्वान् सन्तोष्य आश्वास्य च गुरुभिः सपत्नीकब्राह्मणैः अन्यश्रेष्ठजनैश्च आशीर्वादं जग्राह भगवान् श्रीकृष्णः ततश्च वन्दीजनैः विरुदावलीः शृण्वन् सर्वैः सह मिलित्वा द्वारकानगरीं प्रविवेश ।
श्रेष्ठजनेभ्यः एतत् आचरणमवश्यं स्वीकर्तव्यम् । यतोहि ज्येष्ठाः श्रेष्ठाः वा यथा आचरणं कुर्वन्ति तथैव कनिष्ठा अपि आचरणन्ति । श्रीमद्भगवद्गीतायाम् इत्थं प्रतिपाद्यते -
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।। गीता 3.21
न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्रव्यं वर्त एव त कर्मणि ।। गीता 3.22
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्मानुवर्तन्ते मनुष्याः पार्थसर्वशः ।। गीता 3.23
श्रेष्ठाः जनाः यत्प्रमाणं कुर्वते लोकाः तदनुवर्तन्ते। परमात्मनः किमपि कार्यमवशिष्टं न भवति; तथापि स आचरणं कुर्वन्ति । अत्र यथायोग्यव्यवहारिकज्ञानस्य शिक्षा प्राप्यते । परीक्षितः कलियुगेन सह या वार्ता सञ्जाता सा अमूर्तपदार्थान् अपि मूर्तवत् स्थापयति । तद्यथा -

न ते गुडाकेशयशोधराणां
बद्धाञ्जलेर्वै भयमस्ति किंचित् ।
न वर्तितव्यं भवता कथंचन
क्षेत्रे मदीये त्वमधर्मबन्धुः ।।
त्वां वर्तमानं नरदेवदेहे-
ष्वनु प्रवृत्तोऽयमधर्मपूगः ।
लोभोऽनृतं चौर्यमनार्यमंहो
ज्येष्ठा च माया कलहश्च दम्भः ।।
न वर्तितव्यं तदधर्मवन्धो
धर्मेण सत्येन च वर्तितव्ये ।
ब्रह्मावर्ते यत्र यजन्ति यज्ञै-
र्यज्ञेश्वरं यज्ञवितानविज्ञाः ।।
यस्मिन् हरिर्भगवानिज्यमान
इज्यामूर्तिर्यजतां शं तनोति ।
कामानमोघान् स्थिरजङ्गमाना-
मन्तर्बहिर्वायुरिवैष आत्मा ।।
परीक्षित् कलिमुलाच त्वं मम शरणे आगतोऽस्ति । इदानीमर्जुनोत्पत्रकुलस्यजनेभ्यः तव भयं नास्ति । परन्तु त्वम् अधर्मसहायकोऽसि; अतः त्वं मम राज्ये न तिष्ठेः । राज्ञां शरीरेषु त्वयि स्थिते एव ते लोभ-मिथ्या-चौरकार्य-दुष्टता-स्वधर्मत्याग-दरिद्रता-कपट-कलह-दम्भाचरणं कुर्वन्ति पापाचरणानि वर्धन्ते । अतः अधर्मस्य सहयोगिन् ! अस्मिन् ब्रह्मावर्तदेशे क्षणमपि न तिष्ठेः। अयं ब्रह्मावर्तदेशः धर्मस्य सत्यस्य च निवासस्थानं वर्तते। अस्मिन् क्षेत्रे यज्ञवेत्तारः ज्ञानिनः ऋषयः यज्ञपुरुषभगवतः आराधनायां तल्लीनाः भवन्ति । अस्मिन् देशे श्रीहरिः यज्ञस्वरूपेण विराजमानोऽस्ति । यज्ञैः तस्योपासना विधीयते । सः यज्ञभगवान् प्रजारक्षणं कुर्वन्ति । स सर्वात्मा परमात्मा नारायणः वायुरिव चराचरजीवानामन्तः बहिश्च विराजमानोऽस्ति । अत्र कलेः वर्णनं पूर्णतया सजीवरूपेण कृतं ग्रन्थकारेण ।
वर्षर्तुवर्णनं शरदृतुवर्णनञ्च -
ततः प्रावर्ततं प्रावृट् सर्वसत्त्वसमुद्भवा ।
विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ।।
सान्द्रनीलाम्बुदैर्व्योम सविद्युक्स्तनयिलुभिः ।
अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ।।
तडित्वन्तो महामेघाश्चण्डश्वसनवेपिताः ।
प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव ।।
तपःकृशादेवमीढा आसीद् वर्षीयसी मही ।
यथैव काम्यतपससुः सम्प्राप्य तत्फलम् ।।
निशामुखेषु खद्योतास्तमसा भान्ति न ग्रहाः ।
यथा पापेन पाखण्डा न हि वेदाः कलौ युगे ।।
श्रुत्वा पर्जन्यनिनदं मण्डुकाव्यसृजन् गिरः ।
तूष्णीं शयानां प्राग् यद्वदब्राह्मणानियमात्यये । ।

जलेस्थलौकसः सर्वे नववारिनिषेवया ।
अबिभ्रद् रुचिरं रूपं यथा हरिनिषेवया ।।
अनेन प्रकारेण वर्षायाः कृते बहवः श्लोकाः सन्ति । एत्तेपुउपमेयोपमानयोः संगमः विलक्षणो जायते । वर्षती सर्वेषां जीवानां संख्यावर्धनं जायते। विद्योतमानपरिधिभिः नभोमण्डलं विक्षुब्धमभूत् । आकाशे नीलपयोमुचः भ्रमन्ति । घनीभूताः पप्रेमुचः पूनः पुनः संघनिताः भवन्ति । तथैव प्रतीयते यत् ब्रह्मस्वरूपजीवः गुणावेष्टितो जातः । ज्येष्ठमासस्य औष्ण्येन भूमिः शुष्का जाता आसीत् । वर्षाजलेन पुनः सा हरिता जाता । यथाः सकामभावेन तपश्चर्याकाले शरीरं दुर्बलं भवति पूनः वरदानप्राप्तैः पश्चात् पुष्टं भवति। एतेषु स्थलेषु पूर्णतया आध्यात्मिक मुदाहरणानि विलसन्ति|
"शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः ।
भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ।।
व्योम्नोऽब्दं भूतशरबल्यं भुवः पङ्कमपां मलम् ।
शरज्जहाराश्रमिणां कष्णे भक्तिर्यथाशुभम् ॥
शरदि कमलोत्पत्त्याया जलाशयानां जलं स्वच्छमभवत् । यथा योगभ्रष्टानां चित्तं पुनः योगे संलग्नेन स्वच्छं भवति । इत्यस्य काव्यदृष्ट्या समीक्षणं जातम् ।

## सन्दर्भ

1. वामनशिवराम आप्टे संस्कृतहिन्दी शब्दकोषे
2. काव्यप्रकाशग्रन्थस्य भूमिकायाम्
3. काव्यप्रकाशग्रन्थस्य भूमिकायाम्
4. साहित्यदर्पणे 1/3
5. श्रीमद्भागवते
6. श्री.म.गी.
7. पुरुषसूक्ते
8. श्रीमद्भागवते
9. श्रीमद्भागवते
10. श्रीमद्भागवते
11. श्रीमद्भागवते
12. श्रीमद्भागवते
13. श्रीमद्भागवते
14. श्रीमद्भागवते
15. श्रीमद्भागवते
16. श्रीमद्भागवते
17. श्रीमद्भागवते
18. श्रीमद्भागवते
19. श्रीमद्भागवते
20. श्रीमद्भागवते